# Ganeshashtakam 3

## ગણેશાષ્ટકમ્ ૩

## Document Information

Text title : gaNeshAShTakam 3

File name : gaNeshAShTakam3.itx

Category : ganesha, aShTaka

Location : doc_ganesha

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# Ganeshashtakam 3

# ગણેશાષ્ટકમ્ ૩

ગજવદન ગણેશ ત્વં વિભો વિશ્વમૂર્તે!
હરસિ સકલવિઘ્નાન્ વિઘ્નરાજ પ્રજાનામ્ ।
ભવતિ જગતિ પૂજા પૂર્વમેવ ત્વદીયા
વરદવર કૃપાલો ચન્દ્રમૌલે પ્રસીદ ॥ ૧॥

સપદિ સકલવિઘ્નાં યાન્તિ દૂરે દયાલો
તવ શુચિ રુચિરં સ્યાન્નામસઙ્કીર્તનં ચેત્ ।
અત ઇહ મનુજાસ્ત્વાં સર્વકાર્યે સ્મરન્તિ
વરદવર કૃપાલો ચન્દ્રમૌલે પ્રસીદ ॥ ૨॥

સકલદુરિતહન્તુઃ ત સ્વર્ગમોક્ષાદિદાતુઃ
સુરરિપુવધકર્તુઃ સર્વવિઘ્નપ્રહર્તુઃ ।
તવ ભવતિ કૃપાતોઽશેષ-સમ્પત્તિલાભો
વરદવર કૃપાલો ચન્દ્રમૌલે પ્રસીદ ॥ ૩॥

તવ ગણપ ગુણાનાં વર્ણને નૈવ શક્તા
જગતિ સકલવન્દ્યા શારદા સર્વકાલે ।
તદિતર મનુજાનાં કા કથા ભાલદૃષ્ટે
વરદવર કૃપાલો ચન્દ્રમૌલે પ્રસીદ ॥ ૪॥

બહુતરમનુજૈસ્તે દિવ્યનામ્નાં સહસ્રૈઃ ।
સ્તુતિહુતિકરણેન પ્રાપ્યતે સર્વસિદ્ધિઃ ।
વિધિરયમખિલો વૈ તન્ત્રશાસ્ત્રે પ્રસિદ્ધઃ
વરદવર કૃપાલો ચન્દ્રમૌલે પ્રસીદ ॥ ૫॥

ત્વદિતરદિહ નાસ્તે સચ્ચિદાનન્દમૂર્તે
ઇતિ નિગદતિ શાસ્ત્રં વિશ્વરૂપં ત્રિનેત્ર ।
ત્વમસિ હરિરથ ત્વં શઙ્કરસ્ત્વં વિધાતા
વરદવર કૃપાલો ચન્દ્રમૌલેઃ પ્રસીદ ॥ ૬॥

સકલસુખદ માયા યા ત્વદીયા પ્રસિદ્ધા
    શશધરધરસૂને ત્વં તયા ક્રીડસીહ ।
નટ ઇવ બહુવેષં સર્વદા સંવિધાય
    વરદવર કૃપાલો ચન્દ્રમૌલે પ્રસીદ ॥ ૭॥

ભવ ઇહ પુરતસ્તે પાત્રરૂપેણ ભર્ત્તઃ
    બહુવિધનરલીલાં ત્વાં પ્રદર્શ્યાશુ યાચે ।
સપદિ ભવસમુદ્રાન્માં સમુદ્ધારયસ્વ
    વરદવર કૃપાલો ચન્દ્રમૌલે પ્રસીદ ॥ ૮॥

અષ્ટકં ગણનાથસ્ય ભક્ત્યા યો માનવઃ પઠેત્
તસ્ય વિઘ્નાઃ પ્રણશ્યન્તિ ગણેશસ્ય પ્રસાદતઃ ॥ ૯॥

ઇતિ જગદ્ગુરુ-શઙ્કરાચાર્ય-સ્વામિશ્રીશાન્તાનન્દસરસ્વતી-શિષ્ય-
સ્વામિ- શ્રીમદનન્તાનન્દસરસ્વતીવિરચિતં ગણેશાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Ganeshashtakam 3*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*